# Brahmana Kritam Vamana Stotram

# ब्रह्मणा कृतं वामनस्तोत्रम्

## Document Information

Text title : Brahmana Kritam Vamana Stotram

File name : brahmaNAkRRitaMvAmanastotram.itx

Category : vishhnu, vishnu, vAmanapurANa, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : vAmanapurANa | adhyAya 30/18-31||

Latest update : September 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 28, 2024

*sanskritdocuments.org*

# ब्रह्मणा कृतं वामनस्तोत्रम्

ब्रह्मोवाच ।
जयाधीश जयाजेय जय विश्वगुरो हरे ।
जन्ममृत्युजरातीत जयानन्त जयाच्युत ॥ १८॥

जयाजित जयाशेष जयाव्यक्तस्थिते जय ।
परमार्थार्थ सर्वज्ञ ज्ञानज्ञेयार्थनिःसृत ॥ १९॥

जयाशेष जगत्साक्षिञ्जगत्कर्तर्जगद्गुरो ।
जगतोऽजगदन्तेश स्थितौ पालयते जय ॥ २०॥

जयाखिल जयाशेष जय सर्वहृदिस्थित ।
जयादिमध्यान्तमय सर्वज्ञानमयोत्तम ॥ २१॥

मुमुक्षुभिरनिर्देश्य नित्यहृष्ट जयेश्वर ।
योगिभिर्मुक्तिकामैस्तु दमादिगुणभूषण ॥ २२॥

जयातिसूक्ष्म दुर्ज्ञेय जय स्थूल जगन्मय ।
जय सूक्ष्मातिसूक्ष्म त्वं जयानिन्द्रिय सेन्द्रिय ॥ २३॥

जय स्वमायायोगस्थ शेषभोग जयाक्षर ।
जयैकदंष्ट्रप्रान्तेन समुद्धृतवसुन्धर ॥ २४॥

नृकेसरिन् सुरारातिवक्षःस्थलविदारण ।
साम्प्रतं जय विश्वात्मन् मायावामन केशव ॥ २५॥

निजमायापरिच्छिन्न जगद्धातर्जनार्दन ।
जयाचिन्त्य जयानेकस्वरूपैकविध प्रभो ॥ २६॥

वर्द्धस्व वर्धितानेकविकारप्रकृते हरे ।
त्वय्येषा जगतामीशे संस्थिता धर्मपद्धतिः ॥ २७॥

न त्वामहं न चेशानो नेन्द्राद्यास्त्रिदशा हरे ।

ज्ञातुमीशा न मुनयः सनकाद्या न योगिनः ॥ २८॥

त्वं मायापटसंवीतो जगत्यत्र जगत्पते ।
कस्त्वां वेत्स्यति सर्वेश त्वत्प्रसादं विना नरः ॥ २९॥

त्वमेवाराधितो यस्य प्रसादसुमुखः प्रभो ।
स एव केवलं देवं वेत्ति त्वां नेतरो जनः ॥ ३०॥

तदीश्वरेश्वरेशान विभो वर्द्धस्व भावन ।
प्रभवायास्य विश्वस्य विश्वात्मन् पृथुलोचन ॥ ३१॥

इति वामनपुराणे त्रिंशत्तमाध्यायान्तर्गतं
ब्रह्मणा कृतं वामनस्तोत्रं समाप्तम् ।

वामनपुराण । अध्याय ३०/१८-३१ ॥

vAmanapurANa . adhyAya 30/18-31..

Proofread by PSA Easwaran

*Brahmana Kritam Vamana Stotram*
pdf was typeset on September 28, 2024

Please send corrections to *sanskrit@cheerful.com*